# Shri Harimahima Ashtakam

# श्रीहरिमहिमाष्टकम्

## Document Information

Text title : Shri Harimahima Ashtakam

File name : harimahimAShTakam.itx

Category : vishhnu, svAminArAyaNa, krishna, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीहरिमहिमाष्टकम्

(इन्द्रवज्रा-उपजाति वृत्तम्)
श्रीधर्म-सद्मन्यवतीर्य विष्णु-
र्यो वासुदेवो हरिकृष्ण ईशः ।
श्रीनीलकण्ठोऽत्र पुनाति मर्त्यान्
ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ १॥

यस्य स्वरूपे तिल-लक्षणानि
स्वभक्तचेतांसि हरन्ति यद्वत् ।
अयांसि चाकर्षमणि-प्रवेका
ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ २॥

यस्याक्षरे धामनि यत्प्रसक्ताः
क्रीडन्ति दिव्येऽक्षर-संज्ञमुक्ताः ।
सम्राट् तनूजा इव सर्वमान्या
ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ ३॥

यस्यास्यपद्मेऽद्भुतभूरि शोभे
वसन्ति नेत्रभ्रमरा जनानाम् ।
हंसा यथा मानस-पद्मवृन्दे
ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ ४॥

यः पोषयत्यत्र निजान् स्वकीय-
ज्ञानोपदेशेन सुधोपमेन ।
वत्सान् सुशीला पयसा यथा गौर्
ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ ५॥

पाखण्डधर्मा ह्युदयेन यस्य
शाक्ता व्यलीयन्त यथोदितेऽर्के ।
घूका वृषद्वेषिण एव चान्ये

ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ ६॥

यत्पाद-पद्मेऽक्षरमुक्त-चेतो
भृङ्गा रमन्ते सरसीव मीनाः ।
आसेव्यमाने भुवि भूरिभक्तैर्
ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ ७॥

यदीय-सौन्दर्य-गुणादिपारं
शेषादयो यान्ति न यस्य भक्ताः ।
वाञ्छन्ति नाप्यक्षर-सौख्यमन्तर्
ध्याये हरिं तं हृदि धर्मपुत्रम् ॥ ८॥

इति श्रीगोपाळानन्दस्वामिविरचितं श्रीहरिमहिमाष्टकं सम्पूर्णम् ।

*Shri Harimahima Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*